National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 61-64
© 2025 NJHSR
www.sanskritarticle.com

**स. वासुदेवः**
अनुसन्धाता,
श्री चन्द्रशेखरेन्द्रसरस्वतिविश्वमहाविद्यालयः,
कांचीपुरम-**631561**

**Dr.Sujatha Ragavan**
Assistant Professor,
(Research Guide)
DEPT. Snskrit & Indian Culture,
SCSVMV University,
Enathur, Kanchipuram-631561.

**Correspondence:**
**स. वासुदेवः**
अनुसन्धाता,
श्री चन्द्रशेखरेन्द्रसरस्वतिविश्वमहाविद्यालयः,
कांचीपुरम-**631561**

# अच्युतशतके विशिष्टाद्वैतवेदान्ततत्त्वानां समीक्षणम्

**स. वासुदेवः, डॉ. सुजाताराघवन्**

- **उपोद्घातः**

कवितार्किकसिंहः इति बिरुदाञ्चिताः श्रीमद्वेदान्तदेशिकचरणाः संस्कृतवाङ्मये अत्यन्तं महापण्डितरूपेण विलसन्ति इति सर्वे जानन्त्येव परश्शताधिकाः ग्रन्थाः तैः विलिखिताः। तेषु स्तोत्राणि अपि अन्तर्भवन्ति। तेषु स्तोत्रेषु अच्युतशतकम् इति भगवतः तिरुवहीन्द्रपुरनाथस्य श्रीदेवनाथस्य स्वरूपरूपगुण-विभवमाहात्म्यपरकं प्राकृतभाषया समर्पितम् स्तोत्रं विद्योदते। अत्र शतं श्लोकाः सन्ति। विलक्षणछन्दसा आचार्य सार्वभौमैः स्तोत्रमिदं विरचितं विद्यते। अस्मिन् स्तोत्रे पदे पदे विशिष्टाद्वैततत्व प्रतिपादकाः विषयाः बहवः सन्ति। अतो हतोः अस्मिन् लेखे अच्युतशतके विशिष्टाद्वैततत्वांशाः इति विषयम् आहत्य किञ्चित् विलिख्यते।

**श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी। वेदान्ताचार्यवर्यो मे सन्निधत्ताम् सदा हृदि।।**

**अच्युतशतके विशिष्टाद्वैततत्त्वांशाः ---**

[1]**आगममात्रप्रमाणः**
**आगोपीजनं प्रकाश निज माहात्म्यः।**
**श्रद्धाहित हृदय सुलभः**
**दूरं मुञ्चसि नतसत्य दोलायमानान्।।**

हे नतसत्य! आगममात्रप्रमाणः, आगोपीजनं प्रकाश निज माहात्म्यः, श्रद्धाहितहृदसुलभः (त्वं) दोलायमानान् दूरं मुञ्चसि – इत्यन्वयः ।

आगममात्रप्रमाणः इति मात्र पदेन प्रत्यक्षादिव्यावृत्तिः। वेदैकसमधिगम्यः इत्यर्थः ।

अयमर्थः [2]**"शास्त्रयोनित्वात्"** इत्यधिकरणे सुव्यक्तः। तत्रस्था **"श्रीभाष्यपङ्क्तिः –**[3]**जगज्जन्मादि इत्याशङ्क्य आह – शास्त्रयोनित्वात् --- शास्त्रं यस्य योनिः कारणं प्रमाणम्, तत् शास्त्रयोनि, तस्य भावः शास्त्रयोनित्वम्। तस्मात् ब्रह्मज्ञानकारणत्वात् शास्त्रस्य, तद्योनित्वं ब्रह्मणः। अत्यन्तातीन्द्रियत्वेन प्रत्यक्षादि प्रमाणाऽविषयतया ब्रह्मणः शास्त्रैक प्रमाणकत्वात् उक्तस्वरूपं ब्रह्म** [4]**"यतो वा इमानि भूतानि" इत्यादिवाक्यं बोधयत्येवेत्यर्थः –** इति ।

यद्वा मात्रपदं कृत्स्नार्थकम्। [5]**"वेदैश्च सर्वैः अहमेववेद्यः"** इत्युक्तप्रकारेण कृत्स्नवेदप्रतिपाद्यः इत्युक्तंभवति।**" सर्वं वाक्यं सावधारणम् "** इति न्यायात् प्रमाणान्तराऽप्राप्तत्वं सिद्धम् । अनेन उपनिषद इव पूर्वभागोपि ब्रह्मप्रतिपादकः इत्युक्तं भवति । श्रुतौ दीप्तः, श्रुतिशिरसि तु विदिप्तः इति हि भाषितम् ! एतेन, "वेदस्य उत्तरभागः ब्रह्मप्रतिपादकः, पूर्वभागस्तु इत्यादि देवताप्रतिपादकः" इति पक्षः व्युदस्तः, ब्रह्मणः कृत्स्न वेद प्रतिपाद्यत्वात् ।

किञ्च कार्यपरवाक्यास्येव सिद्धपरवाक्यस्यापि बोधकत्वम् अस्ति – इत्यतः उपनिषदपि ब्रह्मप्रतिपादिका भवेत् । एतेन कार्यार्थे एव शब्दस्य प्रामाण्यं वदन्तः प्राभाकराः निरस्ताः । कार्यसिद्धस्य रूप कृत्स्नवेदस्य ब्रह्मप्रतिपत्तौ हेतुत्वात्।

उपनिषदः सिद्धरूपपरब्रह्म लक्षणतः- इतरव्यावृत्तत्वेन, प्रमाणान्तराऽप्राप्तत्वेन, पुरुषार्थरूपत्वेन च प्रतिपादयन्तीत्यतः"आगममात्रप्रमाणः" इत्युक्त्या चतुस्सूत्र्यर्थः सूचितो भवति।

ततः अपरः श्लोकः

[6]**सदा क्षपित सकलहेयं**
**शरणागतसत्य सत्यज्ञानानन्दम् ।**
**उल्लङ्घितत्रिविधान्तं**
**उपनिषदां शतानि गायन्ति त्वाम्।।8**

हे शरणागतसत्य, उपनिषदां शतानि त्वां सदा क्षपित सकलहेयं सत्यज्ञानानन्दम् उल्लङ्घित त्रिविधान्तं गायन्ति – इति अन्वयः ।

हे शरणागतसत्य, छान्दोग्य बृहदारण्यक तैत्तरीय प्रभृति सर्वोपनिषद्वर्गाः अर्चारूप दिव्यमङ्गलविग्रहविशिष्टं त्वां स्वतः अपहतपाप्मजरामरणादि सकलहेयं, (अपहत पाप्मत्वादि गुणकं इत्यर्थः) सत्यं – निरुपाधिकसत्तायोगिनं, ज्ञानं – नित्यासङ्कुचित ज्ञानैकारम्, आनन्दम् – आनन्दगुणकम् नन्द स्वरूपञ्च, उल्लङ्घितत्रिविधान्तं – देशकालवस्तुरूप त्रिविध परिच्छेद रहितं गायन्ति ।

उपनिषत्प्रपञ्चाः त्वां हेयगुणरहितत्वेन, सकलकल्याणगुणाकरत्वेन, देशकालवस्तु परिच्छेदरहितत्वेन च सकलेतरविलक्षणं आनन्दस्वरूपत्वेन सर्वभाग्यं प्रतिपादयन्तीति भावः।

धर्मिणः स्वरूपनिरूपकधर्मपञ्चकप्रतिपादकं इदं पद्यम्। परमात्मनः सत्यत्व - ज्ञानत्व –अनन्तत्व – आनन्दत्व – अमलत्वादि स्वरूपनिरूपकानि ।

तत्र "सदा क्षपित सकलहेयं " इत्यनेन [7]**"अक्षरधियां तु अवरोधः सामान्यतद्भावाभ्यां औपसदवत् तदुक्तम्"** इति अक्षरध्यधिकरणं श्रीभाष्यार्थः सङ्गृहीतः। सूत्रार्थस्तु – [8]**"एतद्वैतदक्षरं गार्गि" बृहदारण्यके, [9]"अथ परा यया तत् अक्षरं अधिगम्यते" इति मुण्डके च,** अक्षरब्रह्मसंबन्धिनीनाम् अस्थूलत्वादिधियां, सर्वविद्यासु, अवरोधः – सङ्ग्रहणम् इत्यर्थः। [10]**कुतः? सामान्यतद्भावाभ्याम् – सर्वासु उपनिषत्सु उपास्यस्य अक्षरस्य ब्रह्मणः समानत्वात्, अस्थूलत्वादीनां तत्स्वरूपप्रतीतौ भावाच्च। एतदुक्तं भवति – असाधारणाकारेण ग्रहणं हि वस्तुनो ग्रहणम्। न च केवलम् आनन्दादि ब्रह्मणः असाधारणम् आकारम् उपस्थापयति, प्रत्यगात्मन्यपि आनन्दादेः विद्यमानत्वात्। हेयप्रत्यनीको हि आनन्दादिः ब्रह्मणः असाधारणं रूपम्। प्रत्यगात्मनस्तु स्वतः हेयविरहिणोपि हेयसंबन्धयोग्यता अस्ति; हेयप्रत्यनीकत्वञ्च चिदचिदात्मकप्रपञ्च धर्मभूत भूलत्वादि विपरीतरूपम्। अतः असाधारणाकारेण ब्रह्म अनुसन्दधता अस्थूलत्वादि विशेषित ज्ञानानन्दाद्याकारं ब्रह्म अनुसन्धेयमिति अस्थूलत्वादीनाम् आनन्दादिवत् ब्रह्मस्वरूपप्रतीत्यन्तर्भावात् सर्वासु ब्रह्मविद्यासु तथैव ब्रह्मानुसन्धेयमिति – भाषितम् ।**

इत्थम् अमलत्वानतिभिन्नम् अस्थूलत्वादिकं सर्वविद्यानुयायि त्वरूपनिरूपक धर्ममिति सूत्रितम्, अस्मिन् पद्ये सदा क्षपित सकल हेयम् इत्यनेन सङ्गृहीतम् इति उत्पश्यामः ।

हेयत्वं द्विविधम् - 1 स्थूलत्वाणुत्वह्रस्वादिगुणसंबन्धित्वम् 2 सातिशयत्वञ्च । तच्छून्यत्वं हेयप्रत्यनीकत्वम् ।

1स्थूलत्वादिहेयप्रत्यनीकत्वं स्वरूपमात्रम्। सातिशयशून्यत्वं तु स्वरूपस्य गुणानाञ्च समानम्। यथा षट् वर्णस्वर्णापेक्षया दशवर्णस्वर्णं निरतिशयम्, तद्वत् सर्वापेक्षया ब्रह्मस्वरूपस्य निरतिशयत्वम्, तथा ब्रह्मगुणानामपि। तथाच "सदा क्षपित सकलहेयम्" इत्यत्र सकल शब्देन स्थूलत्वाणुत्वह्रस्वत्वस्वादिशयत्वादीनि गृह्यन्ते। ब्रह्मस्वरूपं स्थूलत्वा-दिहेयशून्यं च इत्युक्तं भवति

किञ्च सदा क्षपितानि – निरस्तानि, सकलानां – सर्वपुरुषाणां , हेयानि – पापानि, येन तादृशम्, स्वाश्रितानां सर्वदुरित निवारकम् इत्यर्थोपि लभ्यते ।

अस्मिन् पद्ये जन्माद्यधिकरणश्रीभाष्यार्थश्च विराजते। तं प्रदर्शयामः। "सत्यज्ञानानन्दं उल्लङ्घित - त्रिविधान्तम्" सत्यम् – निरूपाधिक सत्तायोगिनम् इत्यर्थः ।

तेन विकारास्पदम् अचेतनं , तत्संसृष्टः चेतनश्च व्यावृत्तः ।

1 नामान्तरभजनार्हावस्थायोगेन तयोः निरुपाधिक सत्तायोगरहितत्वात् ।

2 ज्ञानम् – ज्ञानस्वरूपं ज्ञानगुणकञ्च। नित्यासङ्कुचितज्ञानैका-कारम् इत्यर्थः । तेन कदाचित्सङ्कुचित ज्ञानत्वेन मुक्ताः व्यावृत्ताः।

3 आनन्दम् – आनन्दगुणकम् आनन्दस्वरूपञ्च ।

4 उल्लङ्घितत्रिविधान्तम् – उल्लङ्घिताः – अतिक्रान्ताः, त्रिविधाः अन्ताः – देशकालवस्तुकृताः परिच्छेदाः येन, तथाभूतं त्रिविधपरिच्छेदरहितमित्यर्थः। स्वरूपेण गुणैश्च आनन्त्यं, तेन सत्यज्ञानरूपपूर्वपदव्यावृत्त कोटिद्वयविलक्षणाः सातिशयस्वरूप स्वगुणाः नित्याः व्यावृत्ताः इति हृदयम्।

[11]**जन्माधिकरणभाष्ये "सत्गुणत्वात् स्वरूपस्य, स्वरूपेण गुणैश्च आनन्त्यं विवक्षितम्, तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः सातिशयस्वरूप स्वगुणाः नित्याः व्यावृत्ताः"** इत्यत्र श्रुतप्रकाशिकाशिकायां विस्तरेण अभिहितम् ।।

[12]**अणुप्रमितस्यापि अच्युत**
**शक्तिः तव धारणादिप्रयुक्ता ।**
**तेन प्रतिवस्तुपूर्णः**
**श्रूयसेऽप्रतिहतनिजस्थितिः सर्वगतः ।।**

अन्वयः- हे अच्युत! अणुप्रमितस्यापि तव शक्तिः सकलधारणादिप्रयुक्ता। तेन (त्वं) प्रतिवस्तुपूर्णः, अप्रतिहत निजस्थितिः, सर्वगतः श्रूयसे- इति ।

[13]**"तेनेदं पूर्णं पुरुषेण सर्वम्"** इति प्रतिवस्तुपूर्णत्वम्, [14]**"अणोरणीयान्"** इति अणुत्वम्, **"नित्यं विभुं सर्वगतं सुसूक्ष्मम्"** इति विभुत्वञ्च भगवतः अभिधीयते। त्रयाणामपि व्यधिकरणतया कथम् एकस्मिन् तेषां समावेशः इत्याशङ्का उदेति । तत्परिहारः अस्मिन् पद्ये प्रतिवस्तु पूर्णस्य कथं विभुत्वम् इति आशङ्का । एकत्र कार्त्स्न्येन व्याप्तस्य अन्यत्र व्याप्तिः कथं सम्भवेत् ? इति – अत्रोच्यते – अणुप्रमितस्यापि तव शक्तिः सकलधारणादिप्रयुक्ता इति। अणुपरिमाण तत्तदुपाध्यवच्छिन्न प्रदेशविशेष विशिष्टस्यापि तव शक्तिः, निखिल प्रपञ्चधारणनियमनादौ विनियुक्ता। अल्पपरिमाण-तत्तद्वस्त्ववच्छिन्न भगवत्स्वरूपैकदेशस्यापि प्रपञ्च धारण सामर्थ्यं पर्याप्तमेवेति भावः। तदेव प्रतिवस्तु पूर्णत्वम् । सर्ववस्तु संपूर्णस्य यादृशं सामर्थ्यं, तादृश सामर्थ्यम् एकदेश परिमितस्यापि स्वरूपस्य अस्ति – इति भावः। तथोक्तम् **श्रीमद्रहस्यत्रयसारे – ब्रह्मणः प्रतिवस्तुपूर्णत्वं नाम" एकैकोपाध्यवच्छिन्नदेशस्यैव सर्वनिर्वहण शक्तित्वम् "** इति । तथाच

**"तेनेदं पूर्णं पुरुषेण सर्वम्"** इति श्रुतेः तेन - ब्रह्मणा, इदं सर्वं – परिदृश्यमानप्रपञ्चः, पूर्णम् – व्याप्तं – इति अर्थः । तस्मात् प्रतिवस्तु पूर्णस्यापि विभुत्वं स्थापितम् ।

पुनः आकाङ्क्शा अवतरति – **"अणोरणीयान् "** इति श्रुतिः विभुत्व बाधिका हि ? इति – तत्रोत्तरमाह – "अप्रतिहतनिजस्थितिः" इति ।

अप्रतिहता – वस्त्वन्तराऽप्रतिरुद्धा,

निजस्थितिः– निजस्वरूपावस्थानां, यस्य सः अप्रतिहतनिजस्थितिः। अतिसूक्ष्मप्रदेश प्रवेशार्हस्वरूपः इति यावात्। अत एवं सर्वगतः श्रूयसे – सर्वव्यापी – विभुरिति श्रुतौ प्रतिपाद्यसे – इति पद्यार्थः ।

तथाच विभोः भगवतः प्रतिवस्तुपूर्णत्वं नाम – सर्वनिर्वहणशक्तिमत्वम्, अणुत्वञ्च –

अतिसूक्ष्मप्रदेश प्रदेशार्हस्व-रूपत्वम्। तस्मात् प्रतिवस्तुपूर्णत्वाणुत्वविभुत्वानाम्, एकत्र भगवति समावेशः सुसङ्गतः इति सारः ।। ततश्च

[15]**सकलानां धारण नियमन –**
**स्वामित्व नियमसम्स्थितस्सर्वतनुः ।**
**श्रूयसेऽच्युत सर्वः**
**स्वयं दर्शित कार्यकारणत्व कर्बुरः ।।**

अन्वयः –

हे अच्युत! त्वं सकलानां धारण – नियमन – स्वामित्व नियमसंस्थितः सर्वतनुः

सर्वः स्वयं दर्शितकार्यकारणत्व कर्बुरः श्रूयसे – इति ।

अवतारिका – वस्त्वपरिच्छेदो नाम न इतर वस्तु सद्भावभावः, अपितु स्वरूपतः गुणतश्च निरतिशयोत्कर्षवत्वं, सर्ववस्तु सामानाधिकरण्यार्हत्वञ्चेति द्विविधम् – इति पूर्वम् उक्तम् । तत्र पूर्वोक्तरीत्या स्वरूपतो गुणतश्च निरतिशयोत्कर्षसंभवेपि सर्ववस्तु सामानाधिकरण्यार्हत्वं कथं भवेत् ? तदा "नीलोघटः" मृदयंघटः इतिवत् प्रपञ्चब्रह्मणोः ऐक्यं हि सिद्ध्येत् !इति शङ्कायाम्, अस्मिन् पद्ये उत्तरमाह । [16]**"सर्वं खलु इदं ब्रह्म"** [17]**"सदेव सोम्येदम्"** इत्यादि श्रूयते। इदं सामानाधिकरण्यं न स्वरूपैक्यपरम्, अपितु शरीरात्मभावनिबन्धनम् । कार्यकारणभावनिबन्धञ्चेति अस्मिन् पद्ये प्रतिपादयति ।

सकलानां – चेतनाचेतनसमस्तपदार्थानां, धारण – नियमन – स्वामित्व नियमसम्स्थितः – नियताधारत्व – नियतनियामकत्व नियतशेषित्वविशिष्टः। अत एव "सर्वतनुः" श्रूयसे – सर्वं – समस्तचेतनाचेतनात्मकं जगत्, तनुः – शरीरं यस्येति विग्रहः। सर्वशरीरकः इत्यर्थः।

एवञ्च अत्र धारकत्वादि प्रतिपादनेन तुल्यवित्तिवेद्यतया जगतः नियताधेयत्व नियमनियाम्यत्व नियतशेषत्वरूप शरीरलक्षणा-क्रान्तत्वं सिद्ध्यति। अतः त्वं सर्वशरीरक इति 'बालो युवा जातः' इतिवत् शरीरात्मभावनिबन्धनं सामानाधिकरण्यं मुख्यमेवेति भावः। तस्मात् ब्रह्मप्रपञ्चयोः ऐक्यं न सम्भवति।

इत्थं शरीरात्मभावनिबन्धनं सामानाधिकरण्यं प्रतिपाद्य, कार्यकारणभावतोपि सामानाधिकरण्यं सम्भवतीति उत्तरार्धे प्रतिपादयति – "स्वयं दर्शितकार्यकारणत्वकर्बुरः सर्वः श्रूयसे " इति। स्थूलसूक्ष्मचिदचित्विशिष्टे स्वस्मिन् दर्शिते – स्वयंदर्शिते। स्वयंदर्शिते कार्यकारणत्वे – उपादानोपादेयत्वे ताभ्यां कर्बुरः – शबलितः। आत्मतया अवस्थितत्वेन कार्यकारणभाव विशिष्टः इत्यर्थः। पद्ये "दर्शित" इति पदस्य प्रदर्शित इत्येकोर्थः। श्रुत्युक्त इत्यपरोर्थः। ब्रह्मसूत्रस्य "दृष्टस्मृतिभ्यां" प्रत्यक्षानुमानाभ्याम् इत्यादौ दृष्टप्रत्यक्षादि शब्दानां श्रुतिरिति भाष्ये अर्थवर्णनवत्, दर्शितपदस्यापि श्रुत्युक्तेत्यर्थसमीचीन एव। ततश्च [18]**"बहुस्यां प्रजायेयेति"** [19]**"सदेव सौम्य"** इत्यादि श्रुत्युक्तकार्यकारणत्वाभ्यां विशिष्टः। तस्मात् सर्व इति श्रूयसे इति पद्यार्थः।

अयमर्थः समन्वयाध्याये अन्ययोगव्यवच्छेदपरायां त्रिपाद्याम् अस्पष्टजीवादिलिङ्ग पादे [20]**"सर्वत्र प्रसिद्धोपदेशात्"** इत्यधिकरणे प्रथमसूत्रभाष्ये प्रतिपादितः इत्थम् – [21]**"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत"** सर्वोत्पत्ति स्थितिप्रलयकारणत्वेन, सर्वस्य आत्मतया अनुप्रवेशकृतजीवयितृत्वेन च सर्वात्मकं ब्रह्म उपासीत – इत्युपासनं विधाय – इति ।।

[22]**पुरुषप्रधान शरीरः**
**भुवनानां भवस्यच्युतोपादानम्।**
**निजसङ्कल्प सनाथः**
**वहसि निमित्तत्वमप्यद्भुतशक्तिः।।**

हे अच्युत ! अद्भुतशक्तिः त्वं, भुवनानां पुरुषप्रधानशरीरः उपादानं भवसि। निजसङ्कल्पसनाथः निमित्तत्वमपि वहसि – इत्यन्वयः।

अस्मिन् पद्ये [23]**"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्"** इत्यधिकरण श्रीभष्यार्थः विवृतः। तत्र एकस्यैव ब्रह्मणः उपादानत्वं निमित्तत्वञ्च प्रतिपादितम्।

पद्यार्थः – लोके निमित्तत्वोपादानत्वयोः भिन्नदेशवृत्तितया, त्वयि तयोः सामानाधिकरण्यात् जगद्विलक्षणसमर्थ्यवान् (अद्भुतशक्तिः) त्वं, पुरुषप्रधानशरीरः – पुरुषाः – जीवाः, प्रधानं – मूलप्रकृतिः, तान्येव आधेयविधेयशेषतया शरीरं यस्य तादृशस्सन्, भुवनानाम् उपादानं भवति। **भुवनशब्दः विपुलतरकार्यविशेषे रूढः"** इति श्रुतप्रकाशिकायाम् उक्तम्। बहुवचनेन सकलदेशकालवर्त्यण्डजातानि विवक्षितानि। सकलदेशकालवर्त्यण्डजातादिरूप विपुलतरकार्य-वर्गाणाम् उपादानकारणं भवसि इत्यर्थः।

सङ्कल्पाश्रयत्वं हि निमित्तत्वं! [24]**"बहुस्यां प्रजायेयेति"** बहुभवनसङ्कल्पविशिष्टतया निमित्तकारणत्वमपि वहसि इति उत्तरार्धस्य अर्थः।

अत्रायम् आक्षेपः अवतरति – यत् समवायिकारणं, यच्च असमवायिकारणं, तदुभयव्यतिरिक्तकारणं निमित्तकारणमितिहि न्यायविद्भिः लक्षणम् अभाति। तेन यत् उपादानं तत् निमित्तम् न भवति, यच्च निमित्तम् तत् उपादानं न भवति। इत्थं नियमस्य सिद्धत्वात् निमित्तोपादानैक्यवादः न सङ्घटते इति।

अत्र ब्रूमः – भगवदुपादानत्वप्रतिक्षेपका भवन्तः स्वप्रक्रिया विरोधादेव भ्रश्यन्तीति । तथाहि। -

जीवः स्वकीयं ज्ञानचिकीर्षा प्रयत्नादिकं शास्त्राभ्यासादिभिः स्वयमेव करोति । तेन तत्र कर्तृत्वात् निमित्तकारणं भवति। तथापि च स्वयमेव समवायिकारणं भवति, स्वज्ञानादेः कार्यं यत्र समवैति तत् समवायिकारणमिति समवायिकारणलक्षणस्य स्फुटम् उपलम्भात्।

किञ्च ईश्वरोऽपि सर्वव्याप्तस्य स्वस्य सर्वैरपि परमाण्वादिभिः संयोगं स्वयमेव सृजति, सर्वकार्यहेतुत्वात्, तथाच तत्र निमित्तकारणं

भवति। समवायिकारणमपि तं प्रति तस्य दृश्यते, परमाण्वादि संयोगस्य ईश्वरनिष्ठत्वात्।

तेन यथा कर्तृत्वं समवायिकारणत्वञ्च युष्मत्सिद्धान्ते ईश्वरनिष्ठमेव भवति, तथा अस्मत्सिद्धान्ते निमित्तत्वम् उपादान-त्वञ्च एक वस्तु निष्ठमेवेति कः विरोधः ?

एवं सति निमित्तकारणतया किं लक्षणमिति चेत् – ब्रूमः उपादानतानवच्छेदक धर्मावच्छिन्नकारणत्वमिति। तथाच यथा काल-स्य कालघटसंयोगत्वावच्छिन्नकार्यतानिरूपितकारणतारूपसमवायि-कारणत्वं, कार्यत्वरूपसामान्यधर्मावच्छिन्नकार्यतानिरूपितकारणत्व-रूपनिमित्तकारणत्वं च दृष्टम्, तथा वेदान्तसिद्धान्ते ब्रह्मणः जगत्प्रति-सूक्ष्मचिदचिच्छरीरत्वेन उपादानत्वं, सङ्कल्पाश्रयत्वेन निमित्तत्वं च सम्भवतीति न किञ्चित् अपहितम्।।

**[25]विषमगुणाङ्कुरप्रकरे जलमिव सामान्यकारणं तवकेळिः।**
**निजकर्मशक्तिनियताः अच्युत ब्रह्मादिस्थावरान्तविशेषाः।।**

अन्वयः – हे अच्युत ! तवकेळिः विषमगुणाङ्कुरप्रकरे जलमिव सामान्यकारणम् । ब्रह्मादिस्थावरान्तविशेषाः निजकर्मशक्तिनियताः इति।

यथा वा परस्परविलक्षणधान्याद्युत्पादनशक्तिविशिष्टे शाल्या-द्यङ्कुरसमूहे जलं साधारणकारणं भवति, तथा तवकेळिरपि ब्रह्मा-दिस्थावरान्तसमुदाये साधारणकारणम्। जगति ब्रह्मादिस्था-वर-पर्यन्तभेदे तत्तच्चेतनानुष्ठितपुण्यपापशक्तिरेव असाधारणकारणमिति। अयमर्थः श्रीभाष्ये [26]**“ वैषम्यनैर्घृण्ये न सापेक्षत्वात् ”** इत्यत्र विवृतः। तदुक्तम् आचार्यपादैरेव यादवाभ्युदये – [27]**“ ब्रह्मादिस्तम्बपर्यन्त विचित्राङ्कुरशालिनाम्। सलिलं कर्मकन्दानां क्रीडैव तव केवलम्।।”** इति । अधिकरणसारावल्यमपि

**[28]“साधारण्येन हेतुः सलिलमिव विभुः सर्वकार्याङ्कुराणां**
**वैषम्यं त्वाविरिञ्चात् प्रतिनियतफलैः प्राणिनां कर्मबीजैः।**
**साम्यं स्वस्य स्वगीतं, श्रुतमपि, तदिहाधोनिनीषादिभेदः**
**तादृक्कर्मानुरूपं फलमिति नियतोऽनादिरेषप्रवाहः।।”**

इति अनुगृहीतम् ।।

- **उपसंहारः**

इत्थं यथामति यथाशक्ति अच्युतशतके विद्यमानानां विशिष्टाद्वैततत्त्वानां प्रस्तावः लेखेऽस्मिन् कृतः विद्यते। इतोऽपि अस्मिन् स्तोत्रे बहवः अंशाः विद्यन्ते। गवेषकाः अपि तान् अंशान् स्वीकृत्य शोधलेखं प्रस्तोतुं शक्नुवन्ति। अत्रत्याः दोषाः क्षमार्हाः इति शम्।।

❖ **Reference :-**


➢**Vishayavaakya Deepika published by Sri Ahobila Mutt, 2001year.**

➢**Srimad Ramanuja’s commentaries on the brahma sutras (Sri Bhashyam, Vedhantha Deepa, Vedanta Sara Moolam), edited and published by Vijayaraagavan, 2018 year**

➢**Sribhashyam with commentary Srutaprakasika published by Sri Uttamur Viraraghavachariar Centenary Trust, year 2002**

➢**Stotras of Sri Vedhantha Desika published by Sri Vedhantha Desika Sampradaya Sabha, eleventh edition 2018**


**पाद टिप्पणी:**

[1]अ.श्लो.7
[2]ब्र.सू.अ1.पा1.सू3
[3]श्री.भा.अ1.पा1.अधि3
[4]कृ.तै.भृ1
[5]भ.गी.अ15.श्लो15
[6]अ.श.8
[7]श्री.भा.अ3.पा3.सू33
[8]बृ.उ.5.8.8
[9]मु.उ.1.1.5
[10]श्री.भा.अ3.पा3.अधि14
[11]श्री.भा.अ1.पा.1.अधि.2
[12]अ.श.श्लो10
[13]तै.उ.2.8
[14]तै.उ.2.8
[15]अ.श.श्लो11
[16]छां.उ.3.14.4
[17]छां.उ.6.2.1
[18]छां.उ.6.2.1
[19]छां.उ.6.2.1
[20]ब्र.सू.अ1.पा2.सू1
[21]छां.उ.3.14.4
[22]अ.श.श्लो12
[23]ब्रसू.अ1.पा4.सू23
[24]छां.उ -6-2-1
[25]अ.श.श्लो13
[26]ब्र.सू.अ2.पा1.सू34
[27]याद-1-50
[28]अधि.सा.237

**सङ्केताक्षरसूचि**

1, ब्र. सू – ब्रह्मसूत्रम्
2, अ – अध्यायः
3, पा – पादः
4, सू – सूत्रम्
5, श्री. भा - श्रीभाष्यम्
6, अधि – अधिकरणम्
7, बृ. उ – बृहदारण्यकोपनिषत्
8, मु. उ – मुण्डकोपनिषत्
9, छां. उ – छान्दोग्योपनिषत्
10, अधि. सा.– अधिकरणसारावळी
11, याद - यादवाभ्युदयम्
12, अ.श – अच्युतशतकम्